## अनुर्यत्समया । (१५/६६९)

समया समीपम् । अनुर्यस्य[1] समीपवाची तेन [2]लक्षणभूतेन सह [3]विभाषा समस्यते, अव्ययीभावश्च[4] समासो भवति । अनुवनमशनिर्गतः[5] । अनुः इति किम् ? वनं समया । यत्समया इति किम् ? वृक्षमनु विद्योतते [6]विद्युत् । 'अव्ययं विभक्तिसमीप°' (२.१.६/६५२) इत्येव[7] सिद्धे पुनर्वचनं विभाषार्थम् ।

## यस्य चायामः । (१६/६७०)

लक्षणेन इति वर्तते[8] । आयामो [9]दैर्घ्यम् । [10]अनुर्यस्यायामवाची तेन लक्षणभूतेन सह [11]विभाषा समस्यते, अव्ययीभावश्च समासो भवति । अनुगङ्गं वाराणसी (म. भा. १.३८०) । अनुयमुनं मथुरा । [12]यमुनायामेन मथुरायामो लक्ष्यते । आयामः इति किम् ? वृक्षमनु विद्योतते विद्युत् ॥

## तिष्ठद्गुप्रभृतीनि च । (१७/६७१)

[13]तिष्ठद्ग्वादयः समुदाया एव निपात्यन्ते । तिष्ठद्गुप्रभृतीनि शब्दरूपाणि अव्ययीभावसञ्ज्ञानि भवन्ति । तिष्ठद्गु कालविशेषः[14] (म. भा. १.३८१) । तिष्ठन्ति गावो यस्मिन् [15]काले दोहनाय स तिष्ठद्गु कालः । खलेयवादीनि[16] प्रथमान्तानि विभक्त्यन्तरेण नैव सम्बध्यन्तेऽन्यपदार्थे [17]च काले वर्तन्ते । चकारोऽवधारणार्थः । [18]अपरः समासो न भवति, परमतिष्ठद्गु इति ।

तिष्ठद्गु । वहद्गु । आयतीगवम् । खलेबुसम् । खलेयवम् । [19]लूनयवम् । लूयमानयवम् । पूतयवम् । पूयमानयवम् । संहृतयवम् । संह्रियमाणयवम् । संहृतबुसम् । संह्रियमाणबुसम् । एते कालशब्दाः ।

समभूमि । समपदाति । सुषमम् । विषमम् । निष्षमम् । दुष्षमम् । [20]अपरसमम् । आयतीसमम् । प्राह्णम् । प्ररथम् । प्रमृगम् । प्रदक्षिणम् । [21]अपरदक्षिणम् । संप्रति । असंप्रति । पापसमम् । पुण्यसमम् । 'इच् कर्मव्यतिहारे' (५.४.१२७/८६६)[22] —— दण्डादण्डि । [23]मुसलामुसलि ॥

## पारे मध्ये षष्ठ्या वा । (१७/६७२)

षष्ठीसमासे प्राप्ते [24]तदपवादोऽव्ययीभाव आरभ्यते । वावचनात् षष्ठीसमासोऽपि पक्षेऽभ्यनुज्ञायते । पारमध्यशब्दौ षष्ठ्यन्तेन सह [25]विभाषा समस्येते, अव्ययीभावश्च समासो भवति । तत्सन्नियोगेन [26]चानयोरेकारान्तत्वं निपात्यते । [27]पारं गङ्गायाः पारेगङ्गम् । [27]मध्यं गङ्गायाः मध्येगङ्गम् । षष्ठीसमासपक्षे–[28]गङ्गापारम् । गङ्गामध्यम् । महाविभाषया [29]वाक्यविकल्पः क्रियते ॥

---

1. समया इत्यधिकम् क.ड.इ.फ.ह, यस्य समया यत्समया ह. 2. लक्षणभूतेन नास्ति फ, सुबन्तेन क. ड. इ. 3. विभाषा नास्ति फ. 4. च नास्ति फ. 5. वनसमीपं गतः इत्यर्थः इत्यधिकम् ड. 6. विद्युत् नास्ति फ. 7. एव नास्ति फ. 8. अनुरिति च इत्यधिकम् ड. इ. 9. दैर्घ्यवाची क. 10. अनुर्यस्यायामः ह. 11. विभाषा नास्ति क. ड. फ. 12. यमुनाया आयामेन ड. 13. तिष्ठद्ग्वादयः नास्ति फ. 14. इति व, कालविशेषे क. ह, तिष्ठद्गु वहद्गु कालविशेषौ ड. 15. काले नास्ति फ. 16. शब्दरूपाणि इत्यधिकम् क. इ. 17. च काले नास्ति क. ड. फ, वर्तन्ते च इ. 18. तेनापरः ड. 19. लूनेयवम् ह. 20. अपरसमम् नास्ति फ. 21. अपदक्षिणम् इ, नास्ति फ. 22. इति इत्यधिकम् फ, केशाकेशि क. 23. नास्ति फ. 24. तदपवादोऽय–मव्ययीभावो विधीयते ड, अव्ययीभावसमासः क. ह. 25. वा क. 26. अनयोः नास्ति ह. 27. पारे, मध्ये ड. 28. गङ्गायाः पारं, गङ्गापारम् । गङ्गायाः मध्यं गङ्गामध्यम् क. 29. तु इत्यधिकम् क. ड. इ. ह.